# अद्वैतप्रमेयविशेषे आक्षेपरिहारौ

अद्वैते तावत् शास्त्रशास्तृशिष्यशिक्षादीनाम् अपारमार्थिकत्वमिष्यते, वस्तुतः संसारस्य सर्वास्यापि कालत्रयेऽप्यभावत्त्वात् | अत्र श्रीशंकरभगवत्पादकृत-दशश्लोकीगतश्लोकोऽयं एवं ब्रूते -

**न शास्ता न शास्त्रं न शिष्यो न शिक्षा**
**न च त्वं न चाहं न चाऽयं प्रपञ्चः।**
**स्वरूपावबोधो विकल्पासहिष्णु-**
**स्तदेकोऽवशिष्टः शिवः केवलोऽहम्।। ७ ।।**

शास्ता उपदेशकर्ता गुरुः । शास्त्रमुपदेशकरणम् । शिष्य उपदेशकर्म । शिक्षा उपदेशक्रिया । त्वं श्रोता, अहं वक्ता, अयं सर्वप्रमाणसन्निधापितः प्रपञ्चो देहेन्द्रियादिरर्थः परमार्थतो नास्तीत्यर्थः । वेदान्तश्रवणादिजनितस्वस्वरूपापरोक्षधीः सर्वस्यापि विकल्पजातस्य बाधं संपादयति, अद्वैतब्रह्ममात्रमवशेषयन् |

अत्रैवमाक्षेपः स्यात् - कथमस्मिन्दर्शने मिथ्याशास्ता मिथ्याशास्त्रं मिथ्याशिष्यं प्रति मिथ्योपदेशफलत्वेन मिथ्याज्ञानं मिथ्यामुक्तिफलम् अभ्युपगम्यते सर्वप्रमाणविरोधम् इति |

अत्रेदमेवं समाधीयते -

शास्त्रादीनामपारमार्थिकत्वं श्रुत्या बोध्यते | तथा हि बृहदारण्यकी श्रुतिः -

तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयं रूपम् । तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम् ॥ २१ ॥ 4.3.21

इत्यत्र जीवात्मनः सर्वसंसारधर्मवर्जितस्वस्वरूपमुक्त्वा अनन्तरमन्त्र एव तन्निरूपयति -

अत्र पितापिता भवति मातामाता लोका अलोका देवा अदेवा वेदा अवेदाः । अत्र स्तेनोऽस्तेनो भवति भ्रूणहाभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति ॥ २२ ॥

अत्र ये ये धर्माः (जागरावस्थायां) संसारावस्थायां आत्मधर्मत्वेन अविद्यया अनुभूयन्ते ते सर्वे तद्धर्मिणि (स्वापावस्थायां) मुक्त्यवस्थायां न भवन्ति इति वदन् मध्ये 'वेदा अवेदाः' इत्यपि कथयति श्रुतिः |

अत्र भाष्यम् -

वेदाः — साध्यसाधनसम्बन्धाभिधायकाः, मन्त्रलक्षणाश्च अभिधायकत्वेन कर्माङ्गभूताः, अधीताः अध्येतव्याश्च — कर्मनिमित्तमेव सम्बध्यन्ते पुरुषेण ; तत्कर्मातिक्रमणात् एतस्मिन्काले वेदा अपि अवेदाः सम्पद्यन्ते ।

अस्यायमर्थो भाष्यानुसारी - पुरुषस्तावत् स्वं कर्तृत्वभोक्तृत्वयुकं मत्वा स्वीयकामनापूरणार्थं खलु वेदमुपगच्छति 'अयं वेदो ममाभिलषितं साधयति तत्साधकं कर्मावबोधनेन' इति भावयन् | स्वापमुक्त्यवस्थयोस्तादृशाभिमानरहितत्वेन वेदस्तं प्रति किमपि प्रयोजनं न साधयतीति जागरसंसारावस्थयोः यो वेदः स एव अवेदतां संपद्यते | सर्वश्रेष्ठमोक्षपुरुषार्थं दत्त्वा वेदो मुक्त्यवस्थायां न स्थास्यति, इतः परमनुपयोगात् |

अनेन इदमपि सिद्ध्यति - वेदाधारितशास्त्रशास्तृशिक्षादयोऽपि न पारमार्थिका अपि तु अविद्याकल्पितसंसारावस्थासम्बद्धा एवेति | इदं तु स्पष्टमवगम्यते बृहदारण्यकादेव -

ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत् । अहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवत् ....1.4.10

अत्र इदमभिप्रेतं श्रुत्या – ‘अहं ब्रह्मास्मी’ति ज्ञानं ब्रह्मैवाप्नोति; तदवगतेः पूर्वमपि ब्रह्म ब्रह्मैवास्तीत् तदजानन् | एतेन गम्यते ब्रह्मणः तदवगतिप्रागवस्था अज्ञानकृता न तात्त्विकी इति | अयं च संसारः ज्ञाननिवर्त्य इति रज्जुसर्पविषये यथा तथैवेति |

शास्त्रादीनां निरूपणं छान्दोग्यषष्ठाध्यायमधिकृत्य क्रियते -

तत्र आरुणिरुद्दालको शास्ता। शिष्यस्तु श्वेतकेतुः। शास्त्रम् मोक्षार्थम् एकविज्ञानेन सर्वविज्ञानविषयम्। शिक्षा च मृदादिदृष्टान्तप्रदर्शनपूर्वकजगत्कारणीभूतसद्ब्रह्मणः सकाशाद्भूतसृष्टिः, तस्य स्थूलसूक्ष्मशरीरकारणत्वम्, सर्वस्य कार्यभूतजगतः कारणसतोऽनन्यत्वं, कार्यमात्रस्य वाचारम्भणत्वेन नाममात्रत्वं तथा उपादानकारणमात्रस्य सत्यत्वम्, तत्त्वमसीति बहुवारमुपदेशेन जिज्ञासोः जीवस्य ब्रह्मस्वरूपत्वम्, श्वेतकेतोः ज्ञानप्राप्तिश्च इति बहुधा बोधनं दृश्यते।

इदं सर्वं 'अत्र वेदा अवेदाः' इति श्रुत्युक्तवेदघटितमेवेति द्रष्टव्यम्।

दशश्लोकीश्लोकस्य श्रीमधुसूदनसरस्वतीकृतसिद्धान्तबिन्दुग्रन्थे श्रुतिवाक्यमेकमुदाहृतम् -

सर्वद्वैतोपमर्देन विकल्पासहिष्णुत्वात् । न हि दृष्टेऽनुपपन्नं नाम । तथा च श्रुतिः—

न निरोधो न चोत्पत्तिर्न बुद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ (आत्मोपनिषत्, ब्रह्मबिन्दूपनिषत्, अवधूतोपनिषत् – इत्यत्र इदं वाक्यं ईषद्भेदेन दृश्यते – 'बद्धो' इति 'बुद्धो' इति स्थाने)

'ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' इत्याद्या । **पूर्वमपि ब्रह्मस्वरूपस्यैव सतो जीवस्य ज्ञानाद्ब्रह्मभावं दर्शयति** । सर्वं च द्वैतं वारयति ॥ ७ ॥

अपारमार्थिकस्य वेदस्य अबाधितमोक्षज्ञानजनकत्वे आरम्भणाधिकरणभाष्ये एवं परिहारः कृतः -

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १४ ॥ 2.1.14

कथं त्वसत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत ? .............नैष दोषः, शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः, स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात् । तत्कार्यमप्यनृतमेवेति चेद्ब्रूयात्, अत्र ब्रूमः — यद्यपि स्वप्नदर्शनावस्थस्य सर्पदंशनोदकस्नानादिकार्यमनृतम् , तथापि तदवगतिः सत्यमेव फलम् , प्रतिबुद्धस्याप्यबाध्यमानत्वात् । न हि स्वप्नादुत्थितः स्वप्नदृष्टं सर्पदंशनोदकस्नानादिकार्यं मिथ्येति मन्यमानस्तदवगतिमपि मिथ्येति मन्यते कश्चित् ।

तथा च श्रुतिः — 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने' (छा. उ. ५ । २ । ८) इत्यसत्येन स्वप्नदर्शनेन सत्यायाः समृद्धेः प्रतिपत्तिं दर्शयति, तथा प्रत्यक्षदर्शनेषु केषुचिदरिष्टेषु जातेषु 'न चिरमिव जीविष्यतीति विद्यात्' इत्युक्त्वा 'अथ स्वप्नाः पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति'(ऐ°आ° ३-२-४) इत्यादिना तेन तेनासत्येनैव स्वप्नदर्शनेन सत्यं मरणं सूच्यत इति दर्शयति । प्रसिद्धं चेदं लोकेऽन्वयव्यतिरेककुशलानामीदृशेन स्वप्नदर्शनेन साध्वागमः सूच्यते, ईदृशेनासाध्वागम इति । तथा अकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः ।

न चेयमवगतिर्निर्त्पद्यत इति शक्यं वक्तुम् , 'तद्धास्य विजज्ञौ' (छा. उ. ६ । १६ । ३) इत्यादिश्रुतिभ्यः। अवगतिसाधनानां च श्रवणादीनां वेदानुवचनादीनां च विधानात् । न चेयमवगतिरनर्थिका भ्रान्तिर्वेति शक्यं वक्तुम् । अविद्यानिवृत्तिफलदर्शनात् , बाधकज्ञानान्तराभावाच्च । प्राक्चात्मैकत्वावगतेरव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम । तस्मादन्त्येन प्रमाणेन प्रतिपादिते आत्मैकत्वे समस्तस्य प्राचीनस्य भेदव्यवहारस्य बाधितत्वात् न अनेकात्मकब्रह्मकल्पनावकाशोऽस्ति ।

इति।

श्वेतकेतुर्मुक्तिज्ञानं प्राप्तवानित्यत्र 'तद्धास्य विजज्ञौ' (छा. उ. ६ । १६ । ३) इति श्रुतेर्वचनम्। तच्चाबाधितमिति सिद्धमेव।

श्रीमद्भागवते -

श्रीमद्भागवतपुराणम्/स्कन्धः ११/अध्यायः ११
https://sa.wikisource.org/s/apk

श्रीभगवानुवाच (उद्धवं प्रति)

**बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ।**
गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् ॥ १ ॥
शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया ।

स्वप्नो यथात्मन: ख्याति: **संसृतिर्न तु वास्तवी** ॥ २ ॥

श्रीमन्नारायणीये -

नारायणीयम्/दशकम् ९४
https://sa.wikisource.org/s/7nz

94th dashaka:
याथार्थ्यात्त्वन्मयस्यैव हि **मम न विभो वस्तुतो बन्धमोक्षौ**
मायाविद्यातनुभ्यां तव तु विरचितौ स्वप्नबोधोपमौ तौ ।
बद्धे जीवद्विमुक्तिं गतवति च भिदा तावती तावदेको
भुङ्क्ते देहद्रुमस्थो विषयफलरसान्नापरो निर्व्यथात्मा ॥ ५॥

अत्रैव भागवते प्रपञ्चस्य मिथ्यात्वमप्युपदिष्टं रज्जुसर्पादिदृष्टान्तेन -

http://vedabase.net/sb/10/14/25/

आत्मानमेव आत्मतया अविजानतां
तेनैव जातं निखिलं प्रपञ्चितम् ।
ज्ञानेन भूयोऽपि च तत्प्रलीयते
**रज्ज्वां अहेर्भोगभवाभवौ** यथा ।। 10.14.25

SB 4.22.38

यस्मिन्निदं सदसदात्मतया विभाति
माया विवेकविधुति **स्रजीवाहिबुद्धिः ।**
तं नित्यमुक्तपरिशुद्धविशुद्धतत्त्वं
प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ॥३८॥

भागवतश्लोकोद्धरणस्यायमाशयः - सर्वस्यापि प्रपञ्चस्य रज्जुसर्पादिवन्मिथ्यात्वे तदन्तर्गतवेदस्यापि तथात्वमिति द्योतनार्थम्।

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥ 4.1.3 इति ब्रह्मसूत्रभाष्ये -

यदप्युक्तम् — अधिकार्यभावः प्रत्यक्षादिविरोधश्चेति, तदप्यसत् , प्राक्प्रबोधात् संसारित्वाभ्युपगमात् , तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्य । ‘यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्’ (बृ. उ. २ । ४ । १४) इत्यादिना हि प्रबोधे प्रत्यक्षाद्यभावं दर्शयति । **प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसङ्ग इति चेत् , न, इष्टत्वात् । ‘अत्र पिताऽपिता भवति’ (बृ. उ. ४ । ३ । २२) इत्युपक्रम्य, ‘वेदा अवेदाः’ (बृ. उ. ४ । ३ । २२) इति वचनात् इष्यत एव अस्माभिः श्रुतेरप्यभावः प्रबोधे ।**

एवं शास्त्राद्यपारमार्थिकत्वे श्रुतिरेव प्रमाणमिति उक्ताद्वैतप्रमेयविशेषे नाक्षेपावकाशः ।

ओं तत् सत्